GANGADHARPUR MAHAVIDYAMANDIR

NAME OF TEACHR: MOUMITA SARKAR

SUBJECT: SANA, PAPER- CC3, SEC-C, UNIT-I

TOPIC: ORIGIN & DEVELOPMENT OF PROSE ROMANCES

(STUDY MATERIAL FOR TUTORIAL EXAMINATION)

संक्षिप्तटीका कार्या: 2.5*2

कादम्वरी-कविसार्वभौमस्य महाकवेः बाणभट्टस्य अन्यतमं गद्यकाव्यं कादम्वरी। कथाकाव्यमिदं बाणभट्टस्य श्रेष्ठा रचना इति मन्यते। कादम्वरीकाव्यस्य विभागद्वयं वर्तते---पूर्वभागःउत्तरभागश्च।पूर्वभागः कविना सम्पूर्णं कृतः।उत्तरभागस्य कियदंशः अपि बाणेन रचितः। अवशिष्टांशः बाणपुत्रेण भूषणभट्टेन विरचितः।कादम्वरी जन्मत्रयस्स्य प्रेमकथा।अत्र नायकः चन्द्रापीडः,नायिका कादम्वरी।मुख्यरसःश्रृङ्गारः।कादम्वरीकाव्यं गौडीरीत्यानुसारं विरचितम्।कादम्वरीपाठेन बाणस्य सर्वशास्त्रदक्षता अनायासं ज्ञायते।कादम्वरीशब्दस्य अर्थः हि सुरा।तदुक्तं पण्डितैः---- "कादम्वरीरसज्ञानामाहारोऽपि न रोचते" इति।

हर्षचरितम्-महाकविबाणभट्टविरचितम् आख्यायिकाप्रकारकं गद्यकाव्यं हर्षचरितम्। ऐतिहासिकाख्यानम् आश्रित्य रचितम् इदं काव्यम्। अस्य नायकःपुष्यभूतिवंशीयमहाराजस्य प्रभाकरबर्धनस्य पुत्रः हर्षबर्धनः।अस्मिन् काव्ये अष्टौ उच्छ्वासाः विद्यन्ते।हर्षचरितं बाणभट्टेन न समाप्तकृतम्।बाणभट्टः तस्य पृष्ठपोषकस्य हर्षबर्धनस्य पराजयं वर्णितुम् अनिच्छुकः सन् हर्षचरितं न समाप्तं कृतवान्।

दशकुमारचरितम्- महाकविदण्डिविरचितेषु ग्रन्थत्रयेषु दशकुमारचरितं हि श्रेष्टम्। आख्यायिकाप्रकारकं गद्यकाव्यमिदम्। आख्यायिकाप्रकारकं गद्यकाव्यमिदम्।ग्रन्थे अस्मिन् विभागद्वयं वर्तते ----- पूर्वपीठिका,उत्तरपीठिका चेति। पूर्वपीठिकायां पञ्च उच्छ्वासाः उत्तरपीठिकायाश्च अष्टौ उच्छ्वासाः विराजन्ते।मगधराजस्य राजहंसस्य पुत्रः राजवाहनः अस्य काव्यस्य नायकः,नायिका च अवन्तीसुन्दरी।मुख्यरसः श्रृङ्गारः।काले प्राप्ते सति राजवाहनः तस्य नवसंख्यकैः मित्रैः सह पितृराज्यपुनरूद्धारार्थं विश्वपर्यटने वहिर्गतः।सर्वेषां दशकुमाराणां विचित्राभिज्ञतायाःअनुलेखनं हि दशकुमारचरितम्।दशकुमारचरिते तत्कालीनसमाजस्य अवनतिः कविः अकपटेन प्रकटीकृतवान्। समासबहुलानां पदानां उपस्थितिरपि दण्डिना पदलालित्येन आच्छादिता। अतः उच्यते----- "दण्डिनःपदलालित्यम्" इति।

शिवराजविजयम्- अम्बिकादत्तविरचितं शिवराजविजयम् इति काव्यं ऐतिहासिकःउपन्यासः। छत्रपतेः शिवाजिनः चरितम् अवलम्व्य विरचितमिदं काव्यं आख्यायिकाप्रकारकं गद्यकाव्यम्।काव्ये अस्मिन् विरामत्रयं विराजते। प्रतिविरामे चत्वारः निश्वासाः सन्ति। अत्र नायकः शिवाजी।काव्यस्य मुख्यरसः वीरः।आङ्गलशासकेन सह शिवाजिनः संग्रामः अत्र विषयः।अस्य काव्यस्य प्रकृतिवर्णनम् अतुलनीयम्।चरित्रचित्रणे कविना अभिनवत्वं प्रदर्शितम्।